A First EPQRST Journal-www.jahnavisanskritejournal.com, Issue-17th, Vol.-V, 14.1.14

ISSN 976-8645

# 'तपरस्तत्कालस्य' सूत्रविचारः

**मधुकेश्वरभट्टः**

**कूटशब्दाः** *तपरः, अण्, वृद्धिः, गुणः*

***तपरस्तत्कालस्य इति द्विपदात्मकं पाणिनीयं सूत्रं विद्यते। सूत्रे तपरपदम् आवर्त्यते। तात् परः तपरः इति तत्पुरुषसमासघटितः प्रथमार्थः, तः परः यस्मात् तपरः इति बहुव्रीहिसमासघटितः द्वितीयार्थः। इदं सूत्रं विध्यर्थं नियमार्थं च भवतीति विषयः अस्मिन् लेखे विशदतया निरूप्यते।***

**वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम्।**
**पाणिनिं सूत्रकारं च प्रणतोऽस्मि मुनित्रयम्।।**

सरसिजासनसुन्दरारविन्दमुखात् निस्ससारोऽयं वेदराशिः। अस्य वेदाराशेरवगमनायैव षडङ्गानि प्रावर्तिषत। अतः षडङ्गसहितवेदाध्ययनं कर्तव्यत्वेनोपदिदेश। तदेव भगवद्भाष्यकाराः ऊचुः–'**ब्राह्मणेन निष्कारणं षडङ्गो वेदोऽध्येयो ज्ञेयश्च**'[1] इति। षडङ्गेषु तावद्व्याकरणं मुखस्थानीयत्वेन जेगीयते। अस्य शास्त्रस्य मुख्यं प्रयोजनं तु पदासधुत्वज्ञापनम्। अत एव शास्त्रमिदं शब्दानुशासनं, शब्दशास्त्रं, पदशास्त्रमिति व्यवहरन्ति। सत्सु ऐन्द्रादिबहुषु[2] व्याकरणेषु पाणिनीयमेव मूर्धावतंसतया विराजते। महर्षिः पाणिनिः चतुर्दशमाहेश्वरसूत्रीमवलम्ब्य लौकिकवैदिकवाङ्मययोः उपचतुस्सहस्रसूत्रात्मिका 'अष्टाध्यायी नाम्ना व्याकरणं निर्ममे। सत्सु सूत्रेषु उपचतुस्सहस्रम् अन्यतममिदं '**तपरस्तत्कालस्य**'[3] इति सूत्रम्। अष्टाध्याय्यां प्रथमाध्याये प्रथमपादे सप्ततितममिदम्। 'तपरः तत्कालस्य' इति द्विपदात्मकम्। अत्र तपरपदम् आवर्त्यते अर्थद्वयसिद्धये। आवृत्ततपरशब्दे प्रथमतपरशब्दः तः परो यस्मादिति बहुव्रीहिसमासघटितः। द्वितीयस्तु तात्परः इति पञ्चमीतत्पुरुषसमासघटितः।

तत्कालस्य इत्यत्र तत्काल इव कालो यस्य इति बहुव्रीहिसमासे तत्कालकालः इति स्थिते '**सप्तम्युपमानपूर्वपदस्य वाच्यो वा चोत्तरपदलोपः**' इति वार्त्तिकेन उत्तरपदकालशब्दस्य लोपे 'तत्कालस्य' इति पदं सिध्यति। तत्कालपदस्य तदुच्चारणसमकालस्य इत्यर्थः। एवं च तपरत्वेन उच्चार्यमाणवर्णकालसदृशकालस्य वर्णस्य संज्ञा इत्यर्थः फलति। एतत्सर्वं मनसि निधाय इत्थमूचुः भट्टोजिदीक्षिताः तः परो यस्मात्स च तात्परश्चोच्चार्यमाणःसमकालस्यैव संज्ञा स्यादिति।

ISSN 976-8645

**बहुव्रीहिसमासस्वीकारे प्रमाणम्-**

तपरपदे द्वा अर्थौ स्व्यकारिषाताम्। ब्रहुव्रीहिसमासघटितार्थस्वीकारे प्रमाणं तु '**अतो भिस ऐस्**'[4] सूत्रम्। तथा हि अकारान्तादङ्गाद् भिस ऐस् स्यादिति सूत्रार्थः। तेन राम + भिस् इति स्थिते अनेन सूत्रेण ऐस् आदेशे रामैः इति रूपं सिध्यति। सूत्रे (अतो भिस ऐस्) अतः इत्यत्र विद्यमान-अकारः '**अणुदित् सवर्णस्य चाप्रत्ययः**'[5] इति सूत्रानुरोधेन स्वभेदस्य ग्राहकत्वात् खट्वाभिः मालाभिः इत्यादावपि भिस ऐसापत्तिः। तपरपदे बहुव्रीहिसमासस्वीकारे तु अतः इत्यत्र तकारः अकारस्य अतत्कालव्यावृत्ततया तपरपदं सार्थकं भजते। तेन खट्वाभि मालाभिः इत्यादौ ऐसादेशो निवार्यते।

**पञ्चमीतत्पुरुषसमासस्वीकारे प्रमाणम्-**

तपरपदे पञ्चमीतत्पुरुषसमासस्वीकारे मानं तु '**सहिवहोरोदवर्णस्य**'[6] इति सूत्रे अवर्णग्रहणम्। तथा हि अनयोरकारस्य ओत् स्यात् ढलोपे इति 'सहिवहोरोदवर्णस्य' इति सूत्रार्थः। तेन सोढः, सोढवान्, उवोढ, अवोढाम् इत्यादीनि रूपाणि सिध्यन्ति। यदि तपरपदं बहुव्रीहिसमासार्थघटितमेव स्यात् तर्हि सूत्रे (सहिवहोरोदवर्णस्य) अकारस्य तपरत्वाभावेन तपरसूत्राप्रवृत्त्या अकारेण दीर्घादीनां ग्रहणसम्भवे तदर्थकृतं वर्णग्रहणं व्यर्थं स्यात्। व्यर्थं सत् ज्ञापयति न केवलं तः परो यस्मात् सः तपरः, किन्तु तादपि परः तपर इति। अमुष्यार्थस्य स्वीकारे सूत्रे (सहिवहोरोदवर्णस्य) केवल-अकारग्रहणे अकारस्य तात्परत्वेन तत्कालिकस्यैव ग्रहणसम्भवे 'अवोढाम्' इति रूपं न सिध्येत्। तद्यथा वह् धातोः लुङि तसि तामादेशे अडागमे च कृते अवह् ताम् इति स्थिते ततः च्लिस्थाने सिजादेशे वृद्धौ सिज्लोपे ढत्वे धत्वे ष्टुत्वे ढलोपे च कृते अवा+ढाम् इति स्थिते ओत्वं न स्यात्। तत्सिध्यर्थं अतत्कालिकानामपि ग्रहणार्थं कृतं वर्णग्रहणं सार्थकं भजते।

**भाष्यप्रमाणम्-**

समासद्वयस्वीकारे न केवलानि सूत्राणि किन्तु '**वृद्धिरादैच्**' इति सूत्रभाष्यमपि प्रमाणं भवति। तद्यथा भाष्ये '**ननु तः परो यस्मात् सोऽयं तपरः। नेत्याह। तादपि परः तपरः**'[7] इति।

तपरपदे बहुव्रीहिसमासाश्रयणस्य उदाहरणम् 'अतो भिस ऐस्' इति सूत्रम्। तत्पुरुषसमासाश्रयणस्य उदाहरणं तावत् 'वृद्धिरादैच्' इति सूत्रम्। अत्र तकरात् परम् ऐच् पदं वर्तते। तेन ऐच्-पदबोध्यदीर्घ-ऐकार-औकारयोः ग्रहणलाभात् गङ्गौघः इत्यादौ त्रिमात्रव्यावृत्तिः। तद्यथा 'वृद्धिरादैच्' सूत्रे भाष्ये 'आन्तर्यतस्त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा मा भूवन्निति **खट्वा इन्द्रः खट्वेन्द्रः, खट्वा उदकम् खट्वोदकम्, खट्वा एलका खट्वैलका, खट्वा ओदनः खट्वौदनः**'[8] इति।

**विधि-नियमविचारः-**

सूत्रमिंद विध्यर्थम् उत नियमार्थम्? इति सन्देहे उभयार्थमिति स्वीचकार। 'अणुदित्सवर्णस्य चाप्रत्ययः' इत्यस्मात् सूत्रात् अण्पदस्यानुवृत्तिपक्षे सूत्रमिदं नियमार्थम्। तद्यथा अणुदित्सूत्रेण

A First EPQRST Journal-www.jahnavisanskritejournal.com, Issue-17th, Vol.-V, 14.1.14

ISSN 976-8645

अष्टादशभेदानां ग्रहणम् अण् पदस्य। अष्टादशभेदे तावत् षड्भेदा अपि अन्तर्भवन्ति। तेन 'अणुदित् सवर्णस्य चाप्रत्ययः' इति सूत्रेणैव षड्भेदानामपि ग्रहणे सिद्धे इदं सूत्रं नियमाय कल्पते। तदा अण् तपरश्चेत् तत्कालस्यैव सवर्णस्य ग्राहकः, न तु अतत्कालस्य इति नियमार्थः फलति। एवं जातिपक्षेऽपि सूत्रमिदं नियमार्थम्। जात्याक्षिप्तसर्वासां व्यक्तिनां ग्रहणात्। यथा, अकारः अत्विावच्छिन्नसर्वेषां भेदानां ग्रहणं करोति तद्वत् अन्ये वर्णा इत्यर्थः। एवं 'गुणा अभेदका इत्येव न्याय्यम्' इति वृद्धिरादैच् सूत्रे भाष्ये सिद्धान्तितत्वात् गुणा अभेदका इति पक्षेऽपि नियमाय सूत्रम्।

'अणुदित् सवर्णस्य चाप्रत्ययः' इत्यस्मात् सूत्रात् अण्-पदाननुवृत्तौ सूत्रं विध्यर्थं भवति व्यक्तिपक्षे। अण्-पदानुवृत्तौ 'वृद्धिरादैच्' इत्यादिसूत्रस्थलेषु आकारस्य अण्ग्रहणेन ग्रहणं न भवति। अणुदित्सूत्रे अण्-पदेन माहेश्वरसूत्रस्थाण्ग्रहणात्। तेन 'वृद्धिरादैच्' इति सूत्रे आत् इत्यत्र अणुदित्सूत्रप्रवृत्त्यभावात् आकारस्य स्वसमकालषड्भेदग्रहणाय सूत्रमिदं विध्यर्थम्।

**अत्रेयं शङ्का-**

'तपरस्तत्कालस्य' इति सूत्रं यत्रानण् तत्र विध्यर्थं भवति। किन्तु यत्र अण्-बोध्यवर्णस्य ग्रहणं भवति, तत्र तु अणुदित्सूत्रस्य प्रवृत्तिः भवत्येव। तद्यथा 'अतो भिस ऐस्' सूत्रे अतः इत्यत्र अण्-बुद्ध्याधारेण अणुदित् सूत्रस्य प्रवृत्तिः वर्तत एव। तदा तपरसूत्रं कथं विध्यर्थमिति सन्देहः।

**समाधानम्-**

'अतो भिस ऐस्' सूत्रे यथा अण्-बुद्ध्याधारेण अणुदित्सूत्रस्य प्रवृत्तिः, तथैव 'अत' इत्यत्र तकारश्रवणात् तपरसूत्रस्यापि प्रवृत्तिः भवति। अणुदित् सूत्रं तावत् '**अस्य च्वौ**'[9] इत्यत्र चरितार्थम्। तपरसूत्रं तावत् 'वृद्धिरादैच्' सूत्रे चरितार्थम्। एवं लब्धावकाशयोः अनयोः द्वयोः सूत्रयोः प्रवृत्तिर्भवति तदा विप्रतिषेधेन तपरसूत्रं परत्वात् अणुदित्सूत्रं बाधते। अतः तपरसूत्रस्य विधित्वस्वीकारेऽपि न कापि क्षतिः।

इदं सूत्रं विभक्तितकारे न प्रवर्तते। अन्यथा '**आद्गुणः**'[10] इति सूत्रेण विधीयमानगुणसन्धिः 'गङ्गोदकम्' इत्यत्रैव स्यात्, न तु 'गणेश' इत्यादौ। अत्र प्रमाणं तु '**उपसर्गादृति धातौ**'[11] इति सूत्रम्। विभक्तितकारे तपरसूत्रस्य प्रवृत्तिः स्यात्तदा ऋति इत्यत्र तपरकरणं व्यर्थं यतो हि 'उपसर्गात्' इत्यत्र विद्यमानतकारेणैव तदर्थसिद्धेः। अतः व्यर्थं सत् ज्ञापयति विभक्तितकारे सूत्रमिदं न प्रवर्तते।

**अत्रायं संशयः-**

तपरशब्दे तत्पुरुषसमासस्वीकारे दोषः प्रवर्तते। तद्यथा '**ऋदोरप्**'[12] इति सूत्रेण ऋकारान्तेभ्य उकारान्तेभ्यश्च धातुभ्यः अप् प्रत्ययो विधीयते। तेन स्तवः यवः इत्यादीनि रूपाणि सिध्यन्ति। किन्तु लवः पवः इति रूपाणि न सिध्यन्ति, यतो हि उकारस्य तात्परत्वात् इति सन्देहः।

**समाधानम्-**

'ऋदोरप्' इति सूत्रे तकारो नास्ति। किन्तु अयं दकारः। अथवा तकारो यदि स्यात् मुखसुखार्थो वा असन्देहार्थो वा अयं तकारो निक्षिप्तः।

इति शम्।

 ISSN 976-8645

# अन्तटिप्पणी

1. महाभाष्यम्-पस्पर्शाह्निकम्
2. ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।
   सारस्वतञ्चापिशलं शाकल्यं पाणिनीयकम्।
3. अष्टा-1-1-70
4. अष्टा-7-91-09
5. अष्टा-1-1-69
6. अष्टा-6-3-112
7. महाभाष्यम्-1-1-1
8. महाभाष्यम्-1-1-1
9. अष्टा-7-4-32
10. अष्टा-6-1-87
11. अष्टा-6-1-91
12. अष्टा-6-1-91

# सन्दर्भग्रन्थसूची

1. सिद्धान्तकौमुदी (तत्त्वबोधिनी सहिता चौखम्बा संस्कृत प्रतिष्ठान दिल्ली)
2. अष्टाध्यायी सूत्रपाठः मोतीलाल बनारसीदास
3. लघुशब्देन्दुशेखः (भावबोधिनी बालबोधिनीव्याख्याद्वयोपेता राष्ट्रिय-संस्कृतविद्यापीठम्, तिरुपतिः
4. महाभाष्यम् (प्रदीपोद्योतसहितम्) राष्ट्रियसंस्कृतसंस्थानम्